# 2025

## SANSKRIT — HONOURS

**Paper : DSCC-6**

**(Gītā and Upaniṣad)**

**Full Marks : 75**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

**Unit – I**

**(Marks : 25)**

1. अधोलिखितयोः यथामति **एकतरस्य** प्रश्नस्य उत्तरं प्रदीयताम्।

 (a) गुणाः कतिविधाः? के च ते? तेषां स्वरूपाणि निरूप्यन्ताम्। 1+3+6

 (b) "मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति।" – श्लोकांशोऽयं कुत्र समुपलभ्यते? कस्येयमुक्तिः? वचनस्यास्य आशयः विस्तरेण व्याख्यायताम्। 2+1+7

2. अधोलिखितयोः श्लोकयोः यथेच्छम् **एकतरस्य** सप्रसङ्गं व्याख्या विधीयताम्। 6×1

 (a) इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः।
 मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः॥

 (b) सत्त्वात् सञ्जायते ज्ञानं रजसो लोभ एव च।
 प्रमादमोहौ तमसो भवतोऽज्ञानमेव च॥

3. अधोलिखितयोः **एकतर**माश्रित्य संक्षिप्ता टीका विलिख्यताम्। 5×1

 प्रकृतिः, महाभूतानि।

4. अधोलिखितेषु यथेच्छं ***द्वितयस्य*** उत्तरं **संस्कृतभाषया देवनागरलिप्या** च प्रदीयताम्। 2×2

 (a) श्रीमद्भगवद्गीतायां कति अध्यायाः सन्ति? तत्र कस्मिन् अध्याये कर्मयोगः उपदिष्टः?

 (b) "तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन।"– कस्येयमुक्तिः? कुरुनन्दनशब्देनात्र कः सम्बोधितः?

 (c) चक्षुषः विषयः कः, श्रोत्रस्य च को विषयः?

## Unit – II

**(Marks : 30)**

5. अधोलिखितयोः यथामति ***एकतरस्य*** प्रश्नस्य उत्तरं प्रदीयताम्।

(a) "उपविश्यासने युञ्ज्याद् योगमात्मविशुद्धये॥"– श्लोकांशोऽयं कुत्र समुपलभ्यते? कस्येयमुक्तिः? प्रसङ्गेऽस्मिन् उपदिष्टस्य ध्यानयोगस्य पद्धतिः भवदीयपाठ्यांशमवलम्ब्य पर्यालोच्यताम्। 1+1+8

(b) बुद्धेः कति भेदाः? के च ते? श्रीमद्भगवद्गीतायाः अष्टादशाध्यायम् आश्रित्य तेषां लक्षणानि निरूप्यन्ताम्। 1+3+6

6. अधोलिखितयोः श्लोकयोः यथाभिलषितम् ***एकतरस्य*** सप्रसङ्गं व्याख्या कार्या (**संस्कृतभाषया देवनागरलिप्या** च)। 6×1

(a) योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥

(b) न हि ज्ञानेन सदृशं पवित्रमिह विद्यते।
तत् स्वयं योगसंसिद्धः कालेनात्मनि विन्दति॥

7. अधोलिखितयोः यथेच्छम् ***एकतर***माश्रित्य संक्षिप्ता टीका विलिख्यताम्। 5×1

लोकसंग्रहः, स्थितप्रज्ञः।

8. अधोलिखितयोः ***एकतरस्य*** श्लोकस्य **वङ्गभाषायाम् आङ्गलभाषायां** वा अनुवादः कार्यः। 5×1

(a) यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत्॥

(b) यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति।
तदा गन्तासि निर्वेदं श्रोतव्यस्य श्रुतस्य च॥

9. अधोलिखितेषु यथेच्छं ***द्वितयस्य*** उत्तरं **संस्कृतभाषया देवनागरलिप्या** च प्रदीयताम्। 2×2

(a) "क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप।"– अत्र परन्तपशब्देन कः सम्बोधितः? शब्दस्यास्य कोऽर्थः?

(b) को नाम प्रशान्तात्मा?

(c) "त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः।"– किं नाम नरकस्य द्वारत्रयम्?

## Unit – III

**(Marks : 20)**

10. अधोलिखितेषु ***द्वितय***माश्रित्य टीका विरच्यताम्। 6×2

(a) श्रद्धा

(b) भक्तिः

(c) योगी।

11. अधोलिखितयोः यथामति ***एकतरस्य*** वङ्गभाषायाम् आङ्गलभाषायां वा अनुवादः कार्यः। 5×1

(a) कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्मसंमूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे
शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्॥

(b) अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः।
सर्वकर्मफलत्यागं ततः कुरु यतात्मवान्॥

12. अधोलिखितेषु यथामति ***त्रितयस्य*** उत्तरं **संस्कृतभाषया देवनागरलिप्या** च लिख्यताम्। 1×3

(a) रिक्तस्थानं पूरयितव्यम्।

"सर्वकर्मफलत्यागं ततः कुरु __________"।

(b) "स मामेति पाण्डव।"– अत्र स इति पदेन क उपदिष्टः?

(c) 'विदधाम्यहम्' इत्यस्य सन्धिविच्छेदः कार्यः।

(d) सर्वेषु कालेषु कोऽनुस्मरणीयः?

(e) "तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः"– कस्य उक्तिरियम्?

---